नं० ३०४-घ

कादम्बरीकथासारः

नं० ३०४

पत्राणि ६६

१५०

तस्यापि ग्रामणिर्नाम धानो नृपात्मजस्तेजसां निधिः ॥ जनेन दोषोपरमप्रबुद्धेनाभिवीक्षितो
दयः ॥६॥ स प्राज्ञिस्वामिने पुत्रमवाप श्रुतशालिने ॥ राज्ञः कर्कोटवंशस्य चंद्रापीड
स्य मंत्रिणे ॥७॥ कल्याणस्वामिना मास्य याज्ञवल्क्य इवाभवत् ॥ तनयः श्रुहृयोग
र्द्धि निर्द्धूतमवकल्मषः ॥८॥ अगाधहृदयात्तस्मात्परमेश्वरमेडनं ॥ अजायत सुतः का
तम्बेंडोदुग्धोदधेरिव ॥९॥ पुत्रे कृततदुन्नानंदं जयंतमजीजनत ॥ व्यक्ताकविभव
कृत्वफलाय यत्र स .रस्वती ॥१०॥ वृत्तिकार इति व्यक्तं द्वितीयं नाम बिभ्रतः ॥ वेदवे

सांगविदुषः सर्वशास्त्रार्थवादिनः ॥११॥ जयंतनाम्नः सुधियस्साधुसाहित्यतत्त्ववित्॥
सूनुस्समभवत्तस्मादभिनंद इति श्रुतः ॥१२॥ काव्यविस्तारसंधानखेदालसधिये
प्रति॥ तेन कादंबरीसिंधोः कथामात्रं समुद्धृतं ॥१३॥ वभूव विदिशा नाम पुरी वेत्र
वतीतटे ॥ या पुण्यकर्मणां तेजःशालिनां द्यौरिवास्पदं ॥१४॥ रेजे रत्नगृहज्योति
र्ज्वालैरिंद्रायुधप्रभैः ॥ तस्यां निजभुजोद्योगविजितारातिमंडलः ॥१५॥ आखंडल इव
श्रीमान् राजा शूद्रक इत्यभूत् ॥ चूडामणीनां लोकपालानां रूपे विचरदप्रिसाः ॥१६॥ श

राम

२

मघदानं दयन्नृतानि म्नंइमाइत्यवेदिय:॥ समेदिंनो विनिर्जित्य चतुरंगो धिमेखलाम्।
॥१आस वित्रार्थित तत्रा रस्तस्यामास्ते यथासुखे॥ तेनानुहृडितजनै रन्यो नाम
विरोधि नि:॥१८॥ विनोदैरत्यनीयेत नवे वयसि वासरा:॥ तस्यन्वान त्याल न्यानोसु
खानां पारहश्वन:॥१९॥ चूनोत्तिसुरतक्रीडापराहृसुखमग्नमन:॥ प्रयत्नेनापिना
ऽवापि सायोपि हिषमेष्ठणा॥२०॥ हन्तुंशशाकयो तस्य हृदयं च सुरेववा॥ अथ वास्यां
ग एस्थानवर्त्तिनं तेकदाचन॥२१॥ प्रसत्य प्रश्रय प्रह्वा प्रतीहारी व्यजिज्ञपत॥ हराडु
पायनीकृत्य मुक्तमाभ्य यी [illegible] हितो [illegible] रा वेडा [illegible] दागता दर्शनार्थिना॥

कृत्वा ह्लणी परास्पृश्य मुखमालोक्य मंत्रिणः ॥२३॥ समादिदेश तां राजा कोदोषः प्रवि
शत्विति ॥ निजेन लक्ष्मणा लोकस्य प्रैपि रिहर्तं त्वया ॥२४॥ मातंगकन्यका विद्धदनुक्ता
ता नृपांगणम् ॥ तया च सहस्तस्थ सम्मुक स्वर्णपंजरः ॥२५॥ वहन्त्र हिंसमाकारं चंडालः
स्थविरोऽविशत् ॥ प्रविशंतीं तु तां दृष्ट्वा कन्यामद्भुतदर्शनाम् ॥२६॥ परं विस्मयतन्मा
पः स्त्रणी चेतस्यचिंतयत् ॥ इदं रूपमियं कोतिरिमेलावण्यशीकराः ॥२७॥ मर्त्येनामपिन
स्याद्रूमर्तिंग चेत्तु का कथा ॥ मेनकामिव पश्यामि नूनं मातंगमायया ॥२८॥ छन्नेयं देव
ता काचिन्मर्त्यलोकमुपागता ॥ [illegible] दिविं [illegible] वनितेव तं ॥२९॥ प्रणनाम

राम
२

3

महीपालमनाकुलविलोकिना ॥ ततः क्षितितलन्यस्तजानुः प्रणतकंधरः ॥ ३० ॥ गादो
नयकरासक्तपंजरः स्थविरोऽब्रवीत् ॥ वैशंपायननामायं रत्नमत्यद्भुतं शुकः ॥ ३१ ॥ रत्ना
नां वास्पदं देव दुग्धोदधिरिवापरः ॥ इत्यादेशेन नः स्वामिन् दुहित्राऽयमुपाहृतः ॥ ३२ ॥
प्रसादः क्रियतामस्याः पतगः परिगृह्यतां ॥ ३३ ॥ इत्युक्त्वासोऽग्रतो राज्ञः पंजरं माणिकु
ट्टिमे ॥ विनिधाय प्रणम्यैनं सप्रश्रयमपासरत् ॥ ३४ ॥ इंगितज्ञा प्रतीहारी विहृतद्वार
संपुटम् ॥ अकरोत्पंजरं तस्मान्निर्याय यो सविहंगमः ॥ ३५ ॥ उत्क्षिप्य दक्षिणं पादं जयश

हृस्तु धैर्यसः॥ प्रयुक्तवेदमंत्राशीरिमामाप्यमिथाऽपवत्॥३६॥ स्तनन्धुगमभ्युस्त्वात्तं स
मीपतरवर्त्तिहृदयशोकाग्नेः॥ चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणां॥३७॥ अथा ता
माकर्ण्य महीपालो विस्मयोत्फुल्ललोचनः॥ कुमारपालनामानं प्रधानामात्यमब्र
वीत्॥३८॥ दृष्टं भवद्भिराश्चर्यमीदृशं श्रुतमेव वा॥ तिर्यक्ष्वेऽतिशयः सोऽयं योमनुष्ये
षु दुर्लभः॥३९॥ श्रुताध्ययनसंस्कारो मातंगस्य न संगतिः॥ मातंगस्य चक्रेनायमिति वि
त्रपरंपरा॥४०॥ अमात्यस्तत्र भूपाधादेनं पृष्ठसंस्कारकारिताः॥ भवेत्यतिशयाः प्रायशः प्रा

एनांकोत्र विस्मयः॥४१॥ एतानितानि लिंगानि परलोकानुमां प्रति॥ नार्किकैः प्रतिप

द्यंते लोकायत्त निराकृतेः॥४२॥ विचित्रा वेधसः सृष्टि र्विचित्राः कर्मवासनाः॥ विचित्रा

स्तद्विपाकाश्च विचित्रः कालपर्य्ययः॥४३॥ इत्यादि श्रुकसंवेधकथा विच्छेदकारणं॥ उ

दग्र नारंगनीरोमधाढ़ पटहध्वनिः॥४४॥ वहिः प्रकल्पतामस्याः सुखमावसथादि

कम्॥ अयं चान्यंतरं पत्रमयं पः प्रवेश्यतां॥४५॥ इत्यादिश्य प्रतीहारोस्त्रामोऽन्म

हीपतिः॥ विसर्ज्ज्य राजन्य चक्रं सेवा र्थमागतं॥४६॥ ततः कृताल्पव्यायामः स्नातः प्रति

5

तद्देववनः॥ कृताग्निः स्नातविप्राशीर्मुक्त्वा शय्यागृहं ययौ॥४७॥ तत्र पर्यंकमारुह्य ध्यात्वा वै
किमपि क्षणे॥ ततोमंतःपुर विश्रान्तेत्सुकमाना यथ्यमुनः॥४८॥ तं चकं न्तुकिनानीतमादोरष्टा
मुखादिके॥ प्रपच्छ कौतुकाद्विप्रस्त हृष्टांतमनंतरम्॥४९॥ वैशंपायन कोऽत्र त्वं कस्मात्तः
को षितस्त्विरे॥ कृतस्त्वमिदं मोहङ्केकलाशास्त्राद्विकौशले॥५०॥ अपि जातिस्मरः कोपि
नवान् नृमिमिमां गतः॥ नखस्त्वपतिशायप्राप्तिरियतीपक्षि जातिषु॥५१॥ केन वा जन्मवतो ना
मकृते विप्रजनोचिते॥ ईदृशान्यभिधानानि कृतोऽयजन वैश्मसु॥५२॥ कथं चांडाल सं

राम
५

पर्यङ्कंइहवाकथमागमः ॥ इतिकात्स्न्येनवृत्तांतमात्मनोवक्तुमर्हसि ॥ ५३ ॥ इतिपृष्टंक्षिती
शेनबहुमानपुरस्सरे ॥ क्षणेबुधाऽनुसंधायमुक्तोवक्तुंप्रचक्रमे ॥ ५४ ॥ रेवाविंध्याटवी
तावत्तवश्रुतिपथंगता ॥ सर्वाऽपरपयोराशिवेलासंस्पर्शशालिनी ॥ ५५ ॥ यदेकदेशेकं
द्रूलगंडेनदलितद्रुमे ॥ उषितोऽहंडकारण्येसरसीतीरामलक्ष्मणो ॥ ५६ ॥ यत्रागस्त्यमुनेरा
सीदाश्रमःश्रमिनोमतः ॥ लोपामुद्राकराक्लिष्टजलसेवर्द्धितद्रुमः ॥ ५७ ॥ तस्योपकंठेपं
पारव्यमस्तिपुण्यजलंसरः ॥ सीताकरातलोल्लूनभ्रवणसरणोत्पलं ॥ ५८ ॥ तस्याऽस्ति

पश्चिमे तीरे जीर्णः शाल्मलिपादपः ॥ आरोहपरिणाहाभ्यां व्याप्तव्योमदिगंतरः ॥५८॥
तस्मिन्कृतकुलायानि वीतभीतिनिदुर्गमे ॥ विहंगमसहस्राणि निवसंति निरंतरं ॥५९॥
दिवातान्यपि निर्गत्य प्राणयात्रामितस्ततः ॥ एत्य चागत्य स्वनीडेषु सुखं रात्रिषु शेरते ॥६०॥
तत्रैव वृद्धवसती अभूतां पितरौ मम ॥ जातोहमेकस्तनयो ययोर्वयसि पश्चिमे ॥६१॥ उ
द्वोढुमसमर्था सा तीव्रां प्रसववेदनां ॥ तथैव पंचतां नीता जननी मे दुरात्मनः ॥६२॥ जाया
विरहदग्धोपि पिता पुत्रेषणातुरः ॥ शोकमुत्सृज्य मत्प्राणपोषणे यत्नमग्रहीत् ॥६३॥

नशशाकक्कचिज्जंतुमात्मनः प्राणवृत्तये ॥ मां वक्षसि निधायास्त नीड एव हि कानिशी ।

।अन्यापत्ररथानीतमुक्तोज्झितफलांबुना ॥ मदाप्यायनशिष्टेन सो करोद्वृत्तिमात्मनः

॥६६॥ अतिक्रामति कालेऽथ किंचिदुद्भिन्नपक्षतौ ॥ तातवक्षस्थलस्थेऽपि मय्युड्डायनला

लसे ॥६७॥ अकस्मादेव संजातमृगपक्षिकुलक्षतः ॥ अभूत्कलकलस्तस्मिन्नरण्ये यम

दुंदुभिः ॥६८॥ ततस्तातोऽस्मत्किंचिदुन्नमय्य शिरोधरां ॥ कुतूहलवशाच्चक्षुर्दिक्षु विक्षि

प्तवान्हे ॥६९॥ अथाऽपश्यमसंख्यातकिरातपरिवारितं । वनेशवरसेनान्यमायातं मृगयारसात् ॥७०॥

३ ससन्नाकः

ततः पीतमिवात्मानमुत्तत्वा तमिव शाल्मलिं ॥ परिवृत्तमिवारण्यं मन्ये नाऽहं मतं क्वचित् ॥७१॥ ह

तप्राणेन सहस्रोघैः स्रवद्रुधिरचर्चितैः ॥ मुहूर्त्तो दिवितद्ध्यावैस्तदरण्यमशृष्यत ॥७२॥

सेनापतिस्स निस्त्रिंशो मृगयाजनितश्रमः ॥ निषसाद ततः पेपासरसस्तीरशाद्वले ॥७३॥ ह

तं क्षिप्रमपापीत्वापः प्राप्य बालमृणालिकाः ॥ पुलिंदैः सह सेनानीस्स जगाम यथागतः ॥७४॥

एको ऽरत्नुलिंदस्तु पापस्तत्र विलेवितः ॥ प्रांशुर्मेयं कराक्रारं कृतांतस्येव किंकरः ॥७५॥

अज्ञात पिशित प्राप्तिस्तु तद्वणाश्रमः ॥ यमदूतीमिव दर्शी सद्द्रौ तत्र शाल्मलीं ॥७६॥

राम

अध्यवसाय उत्साहः।

सदुरारोहतां तस्यज्ञानस्यापि महान्तरोगाज्जाताऽनध्यवसायो पियत्नमारोहणेऽकरोत्॥७७॥
ततोऽहमसमत्रासविपर्यासितमानसः॥ अविशं पितुरुत्संगं तत्पश्चात्कृतविग्रहः॥७८॥ सतु
पापस्तमारुह्य तरुं नीडनिवासिनः॥ हत्वा हत्वा यथाशक्ति शुकान्भूमावपातयत्॥७९॥
क्रमेण स दुराचारस्तातस्यापि शिरोधरां॥ वनेऽजनं च चिच्छेद पक्षिणो विगतजीवितं॥८०॥ पश्चात्
तामममनतच्छोकोनानालिंकन चेतसि॥ केवलं सहजातेन भयेनैवाऽस्मि विप्लुतः॥८१॥ ततो
ऽहं पितुरुत्संगाद्धि निर्गत्य संसाध्वसे॥ अन्तरे तरुणी पर्णजानां पर्णानां तले मा विशे॥८२॥

सप्तर्षेयथानपा।

४

पः सोऽप्यवरुह्याऽधः शाल्मलेर्मूलवर्त्तिनः ॥ भुक्ता नातास्तनादययाधानेनुसरन्त्रगात् ॥ ८३ ॥
अहं विधिनियोगाच्च तेन दुःखकृतकारिणा ॥ जीर्णपर्णस्रवर्णेत्वात्रवानीना वधारितः ॥ ८४ ॥
ततो हरमतिक्रान्ते तस्मिन्दारुणकर्म्मणि ॥ संजातजीविताशोऽपि पिपासापर्यवाधयत् ॥ ८५ ॥
अन्तुद्वयनसामर्थ्यात्पज्ञ्यामेव यथा तथा ॥ घंपाइलिनपर्यंतं गंतुमेच्छं पिपासितः ॥ ८६ ॥
तथापथि निरुत्साहः पतन्मुञ्चक्लिते क्षणः ॥ तमेव पापकर्म्माणं शंकमानः पदे पदे ॥ ८७ ॥ चि
रं हाताततातेतिशोचन्वैवान वर्त्तिनिश ॥ ज्वालेरायास्यमानोऽहमतिष्ठमति निष्ठुरः ॥ ८८ ॥

राम
८

तस्मादनतिदूरेऽथ सरस्सत्यपसां निधेः॥ निर्द्दूतक्लेशजालस्य जाबालेराश्रमो मुनेः॥७९
ततस्तस्य सुतस्तस्मिन्सरसि स्नातुमागतः॥ हारीतनामा मां तत्र तदवस्थं व्यलोकयत्॥८०॥ कष्टं
केनापि पापेन पातितः शुकबालकः॥ कुलायात्क्वापतीतोयं कृपया मो करेऽग्रहीत्॥८१॥ आपा
ययत्पयोबिंदून्मरुताश्वासयन्मुहुः॥ कृताह्निकश्च कारुण्यादनयत्पितुराश्रमे॥८२॥ समाश्व
स्तस्य हारीततातं हृष्टैव पश्यतः॥ पदं स्थिरमिव न्यस्तं हृदि मे जीविताशया॥८३॥ नीडच्युतो य
मानीतो मया विहगपोतकः॥ इति पित्रे प्रणम्याऽसौ पाणिस्थं मामदर्शयत्॥८४॥ अथ जाबा
लिमद्राक्षं साक्षादिव पितामहं॥ महात्मभिः परिवृतं सानुकंपैस्तपोधनैः॥८५॥ जटाधवलम्

सर्वे मुनयस्तामश्रुवन् ॥ बभूव कोयं भगवानू जन्मांतरे किमस्य का दुश्चरितं तदुच्यतां ॥ ८८ ॥ अस्य [illegible] जितो मुनि स्त्रिरिस
नु बध्यमानस्तानब्रवीत् ॥ कुतूहलं तत्रानावद ह्हः क्रियाः स्नाथा प. क्रि ४

१

दृश्नं धाम्ना प्रसरता बहिः ॥ अनतिस्फुटसंलक्ष्यशरीरावयवाकृतिं ॥ ८६ ॥ स तु मां स्तनमुद्वीक्ष्य
स्मयमान इवाऽवदत् ॥ इदं हि भुज्यतेऽनेन फलं स्वस्यैव कर्मणः ॥ ८७ ॥ त्रिकालदर्शी भगवान्स हि
दिव्येन चक्षुषा ॥ विश्वं पश्यति पाणिस्थं करस्थामलकं यथा ॥ ८८ ॥ व वस्तदा कर्णे कुतूहला
कुलास्समेत्य सोध्यं विधाय विधिमस्खलितावधानमाकर्णयितुमस्य कथां प्रयुक्ताः तदा यो ॥ ९० ॥
उक्तास्तथा भगवता मुनयो निजेन कर्मक्रमेण दिवसांगमयो बभूवुः ॥ हारीतहस्तनिहितेन मनो
विनोदैस्तैस्तैरनीयत मयापि दिनावशेषः ॥ ९१ ॥ ॥ इति श्रीमद् जयन्तस्य सूनोरभिनंदस्य कृतौ
कादंबरीकथासारे प्रथमः सर्गः ॥ १ ॥ ॥ श्री ॥ ॥ छ ॥ ॥

राम
९

॥ ॥ अथ सोध्यास्समाध्यंता स्समाप्यस्तुतयः क्रियाः ॥ श्रुत्वा पर्वस्समागम्य यथास्थान
मुपाविशत् ॥१॥ अहमप्यात्मवृत्तांतविस्तारश्रवणोत्सुकः ॥ सेहत्यचापलं सर्वमासं स्थिरम
नास्तदा ॥२॥ दुग्धाब्धिजलकल्लोलधवलैरमृतोक्षितैः ॥ सिंचन्निव करैरिंदुरुदगादास्य
मस्थलीः ॥३॥ भगवाननघज्ञावालिः सुखासीनः स्वविष्टरे ॥ वल्कलाहितपर्यंकबंधो वक्तुं
प्रचक्रमे ॥४॥ सर्वैर्दत्तावधानास्तु शृण्वंतु ते मां तपोधनाः ॥ अमुष्य पूर्ववृत्तांत प्रस्तावोपस्थितां
कथां ॥५॥ अस्त्यवंतिषु संसारलक्ष्म्याः प्रसवभूरिव ॥ निधिरुज्जयिनीनाम नगरी गुणसं

२ एकाग्रचित्ताः

10

पदौ ॥६॥ लंकाऽलकाऽमरावत्यो येषां वसतयः प्रियाः। तेपि यामभिपश्यंतः सुखं तास्तु न
शेरते ॥७॥ यस्यां किमन्यत्कैलासन्निवासरससमुत्सृता ॥ महाकालाभिधानेन रुद्रेणाश्र
यमास्यते ॥८॥ यस्यां नरतमो धात्वा नागीरथपृथूपमः ॥ तारापीड इति श्रीमानबभूव
पृथिवीपतिः ॥९॥ परस्परविरोधेन विप्रकीर्णैरितस्ततः ॥ विश्रम्भमास्यते यत्र संभूय कु
शलैर्गुणैः ॥१०॥ विहसन्बुद्धिविभवैर्भूयस्तद्बृहस्पतीन् ॥ अमात्यः शुकनासाख्यो ब्रा
ह्मणस्तस्य चाभवत् ॥११॥ त्रिविक्रमवदाक्रम्य स राजा पृथिवीमिमाम् ॥ तस्मिन्मंत्रिणि

राम

१०

तद्वारं निष्क्रिप्ताप्सरस्त्वमे॥१२॥ तथा च पालयामास स मंत्री सकलाः प्रजाः॥ यथा त्रिवि

धमप्येता न दुःखं किंचिद स्पृशन्॥१३॥ यथा यथा चलो कोऽस्मिन्निवृत्तो वानुरज्यते॥ राजा

न तथा तथात्मानं कृतकृत्यममन्यत॥१४॥ अङ्के शमर्प्पितं तेन स्वच्छेन्दुमदर्दृष्टिनी॥ संभोग

विघ्नकारातिवालनेमे त्रिसाल्कनं॥१५॥ कृतकृत्यतया चासौ कार्यशेषमचिंतयत्॥ विष

येषा हित प्रीतिरासौ वक्रे यथा सुखं स्म॥१६॥ शोचाहि कृतकृत्यस्य राज्ञो भोगविभ्रत

यः॥ असमाप्तङ्गीषस्यता एव तु विडंवनाः॥१७॥ सद्यु वामधुराकारतरुणीनयनोत्सव

कर्ह्यालासुकःप्राप्तःकामीबुद्धद्धेनोगसंपदः॥१८॥नतेभावानतांक्रीडानतागोष्ठ्योनतेरसाः॥
नतेविलासायत्रास्यपारगंनाऽन्वभून्मनः॥१९॥समयसुखसंभोगभूमिष्ठोपिसम्प्रतिनासु
खमेकेतुनाऽज्ञासीदपत्यालोकनोद्भवं॥२०॥यथायथाचकालेनव्यतीयायनवंवयः॥अ
नपत्यतयाशोकोवर्द्धतेस्मतथातथा॥२१॥सुखव्यसृतावसर्द्धेस्मिन्नंतःपुरकदंबके॥राज्ञी
विलासवत्याख्यायस्यप्राणसमाऽभवत्॥२२॥साराजमहिषीगौरीमभ्यर्थयितुमेकदा॥
देवतायतनंवाह्यैययौभर्तुरनुज्ञया॥२३॥पुराणेवाच्यमानेतुप्रसंगात्पतितोक्षकृति॥अ

राम
२२

४ नात्

पुत्रस्य कुतो लोक इति सुस्राव तत्र सा ॥२४॥ अतप्तलोहसूचीव साश्रुतिः श्रवणान्तरं ॥ विवेश
दधतीत्यसौ परां कामपि वेदनां ॥२५॥ ततः प्रतिनिवृत्ता च प्रविश्य भवनं निजम् ॥ वस्त्रावृत
मुखी भूमावुपविश्य रुरो[illegible]द सा ॥२६॥ सखीभिः प्रार्थ्यमानासा न स्वामिन्यजत स्थितिं ॥ नोदुः
खात्कन्त्वे माहारं किरा मनरोदं ॥२७॥ अथोप[illegible]लभ्यात त्वीडावाञ्च्यपरिजनान्नृपः ॥ प्रविश्यान्तः
पुरं प्राह स्वैरमेनां प्रसादयन् ॥२८॥ प्रिये किमिदमारब्धं रुद्यते किमकारणं ॥ न च यामत्कृतो मन्यु
रनुभूतः कदाचन ॥२९॥ अन्योपि मत्सुखापेक्षी मदधीनात्मजीवितः ॥ कस्तवोत्पादयेन्मन्यु

यस्मै कुप्यसि सुंदरि ॥२०॥ इति प्रसाद्यमाना सा यदा नोवाच किंचन ॥ तदा वेदितवृत्तांतस्तत्स
ख्यान्नृपतिः कृतः ॥२१॥ तेन वृत्तिकरेणाऽथ सो पि दुःखपरायणः ॥ रुरोदेव कृसिन्यास्तस्वा
च्यदयिता सुरवा ॥२२॥ चिरं रुदित्वा निःश्वस्य स्वयमुन्मृज्य लोचने ॥ उग्रादग्रदेराजामहिषीं
मुपसांत्वयन् ॥२३॥ ममापि नन्विये देवि चिरात्त्वन्नतिदुस्सहा ॥ दुनोति हृदयं चिंता निःष्कृती
काररोगवत् ॥२४॥ विफलं वत मे राज्यं विफलाम मम संपदः ॥ विफला मम संभोगा विफलं मम
जीवितं ॥२५॥ कुतोऽस्माकमनागा नाम्नि यत्वा नागपसंपदः ॥ यद्रूपामस्तवोत्संगे वालकाप

राम
१२

त्यमंडितं ॥३६॥ वांछन्क्रीडनकं किंचित्किमप्यव्यक्तमालपन् ॥ आरुष्यति सुतः क्व त्वं कदा
मे पापकर्मणः ॥३७॥ इत्यादि विलपत्यस्मिन्नुवाष्पाकुलितलोचने ॥ शुकनास इमां वार्त्तां ज्ञात्वा
सत्वरमाययौ ॥३८॥ निरपत्यः कृतस्सोऽपि राजेव हतवेधसा ॥ तस्याप्यनेन शोकेन गृहे रोदिति
गेहिनी ॥३९॥ स तु स्वामिगतं दुःखं दुःखमित्यवधारयन् ॥ तद्दुःखापनयोपायप्रवणो धीरम
ब्रवीत् ॥४०॥ क्व धीरप्रकृतिर्देवः क्वेयं विक्लवचित्तता ॥ शोकोऽवकाशं लभते हृदये न भवादृशां
॥४१॥ यद्दौहृदस्त्रीस्वभावेन देवी विक्लवतां गता ॥ तत्किं प्रलंबकूर्चस्य युक्तं देवस्य रोदनं ॥४२॥
कोऽयं हिताहितप्राप्तिपरिहारक्रियाक्षमः ॥ यत्कपोलतलस्थेन्यस्तहस्तं निश्वस्यते चिरं ॥४३॥

यदि दुःखस्थितिः सत्यमनपत्यतया तव ॥ बुद्धिराधीयतां धर्म्मे धर्म्मात्सर्वमवाप्यते ॥४४॥ दीयन्तां
वस्तु विप्रेभ्यः पूज्यन्तां सर्वदेवताः ॥ प्रवर्त्यन्तां प्रपारामाः खन्यन्तां सलिलाशयाः ॥४५॥ नास्ति नाम
जगत्यस्मिन्पुरुषार्थस्य कश्चन ॥ यो धर्म्मनिरतैर्द्धीरैस्तादृशैर्नाधिगम्यते ॥४६॥ इत्यादि शुक
ना सोऽक्रमाकर्ण्य विगतज्वरौ ॥ ९ ॥ उत्थाय स्वस्थवत्सर्वा दंपती चक्रतुः क्रियाः ॥४७॥ ततः प्रभृति
दानानि यागहोमतपांसि तौ ॥ चित्त्रा एप कुरुतां सर्व्वा व्यस्मयन्त ततः प्रजाः ॥४८॥ कदाचिदपि
भूपालः स्वप्ने पश्यन्निशाकरम् ॥ विलासवत्या वदनं प्रविशन्तमखण्डितं ॥४९॥ तथा मनोरमा
नाम शुकनाशस्य गेहिनी ॥ स्वप्ने सत्पुण्डरीकाङ्कां सापि तेन व्यलोकयत् ॥५०॥ अन्ये द्युरुदये जा

राम
२३

नोर्मंगलाचारपूर्वकम्॥ तै स्वप्नं कथयामास शुकनासाय भूपतिः॥ ५१॥ सानंदं सोऽप्यधादे-
वं संपूर्णास्ते मनोरथाः॥ अचिरात्सोष्यते देवी पुत्रं पूर्णेन्दुसुंदरं॥ ५२॥ दिनेष्वथ व्यतीतेषु के-
षुचित्तद्गर्भमग्रहीत्॥ महिषी तत्सखीभ्यश्च तमज्ञासीन्नरेश्वरः॥ ५३॥ तान्नृपः प्रादात्सवासां-
सि चित्राण्याभरणानि च॥ क्रमेण गर्भलिंगेषु व्यक्तेषु मुदितेतराम्॥ ५४॥ शुकनासाय चोवाच
प्रहर्षोत्फुल्ललोचनः॥ सकोऽहं वातकोमे [illegible] घानि वपुष्मन्वासरान्॥ ५५॥ आगेऽप्यदशमे मासे
देवी पुत्रमसूत सा॥ हर्षेण च जगत्सर्वं परिहृत्तमिवाऽभवत्॥ ५६॥ राजा महोत्सवानंदपूर्ण-
पात्रमुदाहृते॥ हृष्टा लोकेषु मातिस्म न त्रिविक्रमवत्त्रिषु॥ ५७॥ शुकनासस्तु राजानं केवेज्ञ

मा

याह निर्झरं॥ श्रौत्सुक्यात्स्मृतिकावासं तातु मावपिञ्जग्मतुः॥ ५८॥ ततो ददृशतुर्व्यक्तसक
लांगं कुँरकं॥ ईक्षतोरुदयरागाढ्यं न वेविंबमिवैंदवं॥ ५९॥ शुकनासो निरूप्यांग मेकैकं नि
पुणं शिशोः॥ हस्ते न्यपालमालं व्यहर्षगर्भमभीषत॥ ६०॥ अयं शंख इदं चक्रमिदं सारवेडम
चुडे॥ यस्य बालस्य विज्ञानि दृश्यंते चक्रवर्तिनो॥ ६१॥ यो ऽसौ स्वप्ने त्वया दृष्टश्चंद्रो देवी
सुखे ऽविशत्॥ सएवा ऽयमिहोत्पन्न मितिमा संशयं कृथाः॥ ६२॥ इति तद्दर्शनानंदसुधा
ह्लावितयोस्तयोः॥ शुकनासगृहाद्ज्ञात सुत्रोत्पत्तिमप्यधात्॥ ६३॥ शुकनासमथोदारमा
लिलिंग महीपतिः॥ उत्तरीयं च हारो ऽस्य पूर्णपात्रमिति स्वयं॥ ६४॥ उवाचैनं प शोदं सुखस्यो

चै

राम
२५

परिनः सुखम्॥ इमे ते पतिताः सत्यं नुहिन्ने सोमरश्मयः॥६५॥ साभिदं वेधसारत्नं चिंतानुरु

मावयोः॥ सहैव पात्रतां [illegible] नीतौ यदावां सुखदुःखयोः॥६६॥ ततस्तूर्यरवैर्नित्यं चञ्चरी

तालनिस्वनैः॥ सिंदूरघनसारादिक्षोदैः कुंकुमकर्द्दमैः॥६७॥ अनपेक्षितनाचोच्चव्यवहार

निरर्गला॥ केलिः प्रववृते तत्र राजगेहे महोत्सवे॥६८॥ राज्ञानुस्वगृहे केलिविमर्द्दंवीक्ष्य

ता हृष्टं॥ शुकनासगृहं गत्वा द्विगुणं तमकारयत्॥६९॥ कृते ऽथ जातकर्मादौ वृत्ते षष्ठीप्र

जागरे॥ विलासवत्यां स्नातायां प्रयोकाल उपस्थिते॥७०॥ प्रशस्ते ऽह्नि दैवज्ञैरुक्ते ज्ञातो

महीपतिः॥ स्नातः सुवर्णसदृशो पूजयित्वा द्विजोत्तमान्॥७१॥ सम्प्रेष्य गानि वासांसि वर्षने

15

परिरुन्ने शिशोः॥ चंद्रापीड इति स्वप्नसदृशं नाम निर्ममे॥७२॥ शुकनासोपि संहृष्ट्य विप्रा
न्विप्रजनोत्तिते॥ वैशंपायन इत्यात्मसूनोर्नाम प्रशातिवान्॥७३॥ क्रमेण वर्द्धमानोऽथ कृत
चूडादिमंगलः॥ चंद्रापीडोऽभवत्पित्रोः परमुत्संगमंडनं॥७४॥ आकारणेंदुतुल्येन मधुरै
र्वलिवल्गितैः॥ अव्यक्तवर्णैरालापैर्हरस्ततयोर्मनः॥७५॥ प्राप्तेऽथ सप्तमे वर्षे विद्यागृहम
कारयत्॥ चंद्रापीडस्य नगराद्बहिर्विद्गुणो नृपः॥७६॥ कृतोपनयनं चैनं काले तत्र जनो वि
ते॥ तत्रन्यवेशयद्राजा विद्याधिगमसिद्धये॥७७॥ तर्कव्याकरणाभिज्ञान्धनुर्वेदविशारदा
न्॥ दंडनीत्यादिनिपुणानाचार्यान्पर्यकल्पयत्॥७८॥ शुकनासोपि तं पुत्रमुपनीय यथाविधि।

राम

५

राजपुत्रान्गुणं चक्रे विद्यागृहनिवासिनम् ॥७९॥ नृपतिस्त्वगमद्दुःखं पुत्रं गुरुगृहे स्थितं ॥ प्रा
र्थितोपि सतन्मात्रा नैनमानाययत् गृहे ॥८०॥ सर्णो षोडशवर्षस्तु राजपुत्रः कुशाग्रधीः ॥ सगृ
ह्यापितो विद्याः सर्वाभ्यस्ता इवाग्रहीत् ॥८१॥ सर्ववादिषु वक्तासूत् सर्वशास्त्रेषु कोविदः ॥ प्रौढः
कलासु सर्वासु दक्षस्सर्वेषु कर्मसु ॥८२॥ सर्वसंव्यवहारेषु सोभूद स्खलितक्रमः ॥ सर्वशास्त्रा
र्थतत्वज्ञस्सर्वभाषासु सत्कविः ॥८३॥ क्रमेण वर्द्धमानश्च स व्यायाममसेवत ॥ सुमुखेच तदभ्या
सात्स्याश्च सर्वांगसौष्ठवः ॥८४॥ प्रलंबबाहुः पीनांसः पृथुवक्षा स्तनूदरः ॥ गंभीरनाभिर्दृढोरुस्तरु
णः करिसत्गतिश्च ॥८५॥ सुकुमारस्तु तस्यासीत् प्रतिबिंबइवाभवत् ॥ गुणैरशेषैरन्यत्र शरीरश्रीण

बल

ध्वजिनी वाहिनी सेनेत्यमरः॥२

16

गौरवात्॥८६॥ अथ राज्ञा सुतं बुद्ध्वा कृतार्थं गुरुवेश्मनः॥ शुकनासगिरा गेहमानेतुमुपचक्रमे॥८७
स बलाहकनामानमाहूय ध्वजिनीपतिं॥ पुण्येऽह्नि प्राहिणोत्पुत्रमानेतुं कृतमंगलः॥८८॥ तथेन्द्रायुध
नामानं प्रेषयामास वाजिनं॥ जितोच्चैःश्रवसं तेजोरनन्यसुलभैर्गुणैः॥८९॥ सहस्रै राजपुत्राणां
विनीतं वाङ्कुशालिनाम्॥ व्यसर्जयच्च तेनैव सह पुत्रानुवर्तिनो॥९०॥ बलाहकस्ततो गत्वा विद्यागृ
हकृतास्पदं॥ अद्राक्षीद्राजपुत्रं तं प्रणनाम च सादरं॥९१॥ आचचक्षे स राजाज्ञां गृहमागम्यता
मिति॥ सनामग्रहणं चासौ राजपुत्रानन्यवेदयत्॥९२॥ ततो बलाहको ख्यातशौर्यो हि गुणगौ
रवाः॥ राजपुत्राः ५ प्रणेमुस्तं गुरुकृतमिवाऽपराः॥९३॥ पर्यायेण रत्नज्योतिर्निर्जितेन्द्रायुधप्रभं

अन्यांतरासुलभैः ३

४ बलाहकेन

पल्यान १

राम
२६

तारापीडस्प २

इंद्रायुधं प्रवेश्याथ भुवन राह वलाहकः ॥९४॥ इममारोह सिंधूत्थम[illegible]श्वरत्नमयोनिजं ॥ पारसी
काधिपतिना देवस्यौपायनीकृतं ॥९५॥ चंद्रापीडः स्कंधे तेवीत्य पत्तुरंगममनुत्तमं ॥ परं विस्मयमापे
दचिरं चैवं व्यचिंतयत् ॥९६॥ हृदयं मे ब्रवीतीति नैषसत्यं तुरंगमः ॥ कोपि केनापि पापेन नूनं तु
रगतां गतः ॥९७॥ अयोनिजश्च वाजीयमेतदुक्तात्र साक्षिणी ॥ रंभा किलाप्सरः कन्या शापेन वड
वाऽभवत्॥९८॥ गरुत्मतीदमुच्चैश्रवसि वाभवत् ॥ तेजसामाहृति वापि न सामान्येषु
वाजिषु ॥९९॥ इति बुध्वा विकल्प्याथ वलाहकसमर्पितैः ॥ कुसुमस्त्रगलंकारदुकूलैः कृतमंग
लः ॥१००॥ गुरूनामंत्र्य दत्ताशीर्ब्राह्मणैर्विहितस्कृतः ॥ वैशंपायनमारूढमालोक्यातुरगोत्तरम् ॥ ॥

यो ऽसि सोऽसि नमस्तुभ्यमारोहातिक्रमस्त्वया ॥ मर्षणीयो ऽयमस्माकमारुरोहेति तं वदन् ॥ ३ ॥ स
इन्द्रायुधमारुह्यैवं नतेयमिवाऽच्युतः ॥ अपि त्रिजगतीं कृत्स्नां मेने हस्तगतामिव ॥ ३ ॥ स वैशंपायन
सखो ऽथ निर्गत्य भवनात्ततः ॥ राजपुत्रैः परिवृतो विवेश नगरीं ततः ॥ ४ ॥ तमथ पुरतरुण्यो राजमा
र्गेणायांतं ददृशुरवलकांतिं सौधवातायनस्थाः ॥ व्यपगतगुरुलज्जास्तेऽन्तमोऽकंपितांगाः स्मर
जनितविकारैर्लोलविनेरर्चयंत्यः ॥ १० ॥ ॥ इति कादंबरीकथासारे द्वितीयः सर्गः ॥ २ ॥ ॥
॥ स प्राप्य नृपतिद्वारमवतीर्य तुरंगमात् ॥ राजधानीं ससेनानीस्सवैशंपायनो ऽविशत् ॥ १ ॥
प्रविश्य च सभामध्ये हर्षबाष्पार्द्रचक्षुषः ॥ न्यस्तजानुः क्षितौ मूर्द्ध्ना ववंदे चरणौ पितुः ॥ २ ॥ आ

राम

कारती४

लिलिंगसुतं राजा चुचुंबशिरसि क्षणे॥ ग्रहीतुमैकडुत्संगेसतुन्नमावुपाविशत्॥३॥ दृष्ट्वं पुनः
पुनःप्रहृष्टमत्तेनेनापिनृसुतः॥ विसृष्टोऽथ गुरुः सविलासमातरं वंदितुं ययौ॥४॥ तांसुतालोक
नानंदस्फुरत्क्षीरपयोधरो॥ प्रणामप्रजननी स्वसबीनंदयामासवंदनैः॥५॥ अभिनंदयकृतं तामि
रवतीरंगमंगलं॥ शुकनासमथद्रष्टुमाययासीत्तस्यमेदिरं॥६॥ द्वारिवाजिनमुत्सृज्य प्रविश्य
तत्रयेनतौ पित्रवज्ञाणनामाऽसौमौ लिनामेदिनीस्पृशा॥७॥ नमंतमेन मुत्थाप्यास्वयमुत्थाय
सादरं॥ शुकनासस्तडयाहकं वेपुलकितानन॥८॥ कृतयत्नोऽपिनाध्यास्य चारुचामीकरासनं
चेन्द्रापीडः क्षितावैवतस्यन्याविशतायतत्॥९॥ शुकनासेवसुचंतमासनं स्वंन्यवारयत्॥ तत्क्षण

मिव स्थित्वा द्रष्टुं प्रागान्मनोरमां ॥१०॥ सप्रश्रयं प्रणम्याथ तां विलासवतीमिव ॥ ततोऽवाप्तविवि
द्याशीर्मंगलो निरियाय सः ॥११॥ चंद्रापीडस्य याद्दृष्टो दर्शनालिंगनक्रमः ॥ स वैशंपायनस्या
पि तादृशो गेहे गृहहृद्ये ॥१२॥ न कश्चन सुतस्नेहविशेषश्च तयोः स्मृतः ॥ मंत्रि [illegible]
[illegible] णो राजपुत्रे वा मंत्रिपुत्रे नृपस्य च ॥१३॥ सर्वोपिकरणोपेतं पित्राप्यर्वेव प्रकल्पितं जग
मचंद्रापीडोऽथ कुमारभवनं महत् ॥१४॥ सुसन्निवेशमालोक्य तत्र रेमे चिराय सः ॥ स्थिति
मिंद्रायुधस्यापि स्ववासे पर्यकल्पयत् ॥१५॥ ततः स्नातानुलिप्तांगं कृताहारं सुखस्थितं ॥ मात्रा
विसृष्ट आगत्य कंचुकी तमभाषत ॥१६॥ इयं हि पत्रलेखाख्या कौंबोजेश्वरकन्यका ॥ केनापि दे

राजमंत्रिणो ३

राम
१८

वयोगेन परिभ्रष्टा पितुर्गृहात्॥१७॥ बाल्येव वर्द्धिता देव्या स्वयमंतःपुरे निजे॥ योग्या सकलविस्रं
न्नम्रमिस्त्वे पार्श्वेवर्त्तिनी॥१८॥ मयैवेति देव्या प्रहिता कुमारप्रतिग्रहतां॥ इत्युक्तोपाहरकन्यांवि
नीतां प्रियदर्शनां॥१९॥ सानुतेनार्प्पिता कन्या ततः प्रभृति तेन या॥ असेवत यथा चापविरं विनमिवा
न्नवत्॥२०॥ चकार तां च तांबूलकरंडस्याधिकारिणीं॥ तुतोष च युगेरस्याः शीलाचारनयादिभिः
॥२१॥ कियत्स्वपि व्यतीतेषु दिवसेष्वपि पार्थिवः॥ यौवराज्यविधौ सूनोः संविधानमसिश्रियत्॥२२॥
सेक्रमं त्रासुकनासेन सह विस्रंभनिर्भरं॥ संभारसंग्रहारंभमकरोत्कृतमंगलः॥२३॥ सेन्निकृष्टाभि
षेके च दर्शनार्थमुपागतं॥ चंद्रापीडमथोवाच शुकनासस्सविस्तरे॥२४॥ तातविज्ञातमास्थस्पावि

नयाचारशीलिनः॥ नाल्पमप्युपदेष्टव्यमस्थिरमतेस्तव॥२५॥ किं तु लोकत्तरा लक्ष्मीरस्थि
रामपिदं वपुः॥ नवं वयः परा शक्तिरिति दुर्विषहो ज्वरः॥२६॥ लक्ष्मीर्न्नाम ह्वरः पुंसामन्यथाभाव
कारणं॥ विरलास्ते विकाराय न येषां तत्परिग्रहः॥२७॥ पुष्णाति तीक्ष्णमूष्माणो हि न स्थिर्व्यक्तवा
दितो॥ करोति मक्क विह्वषमसमः श्रीकृतोज्वरः॥२८॥ न पश्यंति न शृण्वंति नापेक्षंते हिताहिते
न विषयः किं विचेष्टंते कष्टं श्रीविप्लुता नराः॥२९॥ क्रमागतो न चैतस्या माश्वासः कोपि विद्यते
॥ ह्योपि यत्रोषिता लक्ष्मीस्तत्राद्यैव न दृश्यते॥३०॥ वातरक्ता निसृतेव निम्न पादे वकंटकैः॥ लक्ष्मी
र्विधातुं शक्नोति न कंचिन्निर्भरं पदं॥३१॥ श्रीस्सपत्नीमिव द्वेष्टि विद्यां हिं सत्यप्रवर्त्तिनी॥ तो विना

जधुरं पित्रा कल्पितामुद्वहन्नस्थिरो ॥ विजितामपि चानेन भुनज्मि य वसुंधरो ॥४०॥ इत्युक्त्वा विरराम सो
त कल्याणपरायणः ॥ चंद्रापीडस्ततस्तद्वाग्भिरलंकृत इवाऽभवत् ॥४१॥ अथ पुण्येऽहनि स्नातं विधिवत्
कृतमंगलं ॥ यौवराज्येऽभिये पुत्रमभ्यषिंचन्महीपतिः ॥४२॥ अभिषेकोत्सवस्तस्य जन्मलाभोत्सवाद
पि ॥ अधिकस्सर्वलोकस्य बभूवानंदवर्धनः ॥४३॥ सर्वाभ्यो दिग्भ्य आगत्य गृहीतोपायना नृपाः
द्विजाश्च तुतुषुः प्राप्य गोभूकनकदक्षिणाः ॥४४॥ अन्यत्राऽहनि दैवज्ञैः श्लाघ्ययोगगुणान्विते ।
दत्तो दिग्विजये यात्रां युवराजे नृपाज्ञया ॥४५॥ कृतप्रस्थानहोमोऽसौ विधिज्ञेन पुरोधसा ॥ शस्त्राऽस्त्र
चक्रमभ्यर्च्य शास्त्रोक्तैर्मंत्रविस्तरैः ॥४६॥ गीतस्वस्त्ययनो विप्रैः प्रचुरस्वर्णतोषितैः ॥ यत्तस्कृ

राम
२०

20

क्षको मात्राकृतप्रस्थानमंगलः॥४७॥ शंखदुंदुभिनिर्घोषमुखरीकृतदिङ्मुखः॥ स्कृतस्तारंप
तद्भिश्च सूतमागधवंदिभिः॥४८॥ स्रग्विलेपनधूपादिसंभाराञ्चितदेवतः॥ पितरोष्मुकनासंवग्र
णम्य निरगात्स्वहात्॥४९॥ इंद्रायुधमयारूढः पौरजानपदाशिषः॥ श्रुएवन्नगर्याः पूर्वेणद्वारे
णनिरियायसः॥५०॥ ततोनुगम्यमानोसौ वलाहकनिवेदितैः॥ सहस्रसंख्यैः क्षितिपैस्सलासछ
त्रचामरैः॥५१॥ वैशंपायनमेकत्रपार्श्वस्थितास्ववर्त्तिनं॥ अन्यत्रयत्रलेखाख्यां पश्यन्नश्ववतरी॥
स्थितां॥५२॥ तस्मिन्नहनिसत्कोकं प्रस्थायोच्छ्रिततोरणं॥ चित्रंनिवासमध्यास्तदग्राकग्राकूलेप्र
कल्पिते॥५३॥ अथाऽपरेद्युरुत्थाय ऽशेषामरणभूषितः॥ प्रावर्त्ततप्रबंधेनप्रस्थानुमनुलोघमं॥५४॥

पीडयन्निव सैन्येन पातालतलवासिनः ॥ रजसा च तदुत्थेन स्थगयन्नगतं गगनस्थितान् ॥५५॥ नम
यन्ननतान्नम्रपानानतान्परिपालयन् ॥ अवपानुत्खनन्कांश्चिदुत्खातान्प्रतिरोपयन् ॥५६॥ विश्वा
सयन्नविश्वस्तान्संरक्षन्नुपशारणागतान् ॥ शत्रुंस्तु सादयन्दंडैस्साधूंस्संमानयन्धनैः ॥५७॥ ब्राह्म
णेभ्यो ददद्ग्रामान्कुर्वन्देवकुलावलीः ॥ वनानि निजचिह्नानि तत्र तत्र प्रवर्त्तयन् ॥५८॥ वर्षत्रि
तयमात्रेण समयग्रामण्णं वा वधिं ॥ स वत्रामसवं धेनमांधातेव वसुंधरां ॥५९॥ जिगाय प्रथमं प्रा
चीं दिशं तदनु दक्षिणां ॥ ततः प्रतीचीं पश्चाच्च पतापतिर्धिरुत्तमं ॥६०॥ पृथग्रहेमकूटाख्यानां कि
रातानां निकेतनं ॥ स सुवर्णपुरं जिचाद्दंडजयाहहेलया ॥६१॥ याचकेलाससीमां तम्न्वितांत

राम
२१

मनोरमा॥ तस्यां दिग्विजयश्रांतः क्रियतोऽध्यास्त वासरान्॥६२॥ एकदानुसतं तस्थानादारुहेंद्रा
युधं वने॥ मृगया निर्गतोऽपश्यत्किंनर्या सह किंनरं॥६३॥ आलोककौतुकाकृष्टहृष्टः रथवसु
खोचतो॥ आदिस्तुः प्रेरयामास तावेव प्रति वाजिनं॥६४॥ अपूर्वपुरुषालोकत्रासात्कैलासकंद
रे॥ प्रवेष्टुकामौ सहसा वेगेनानुससार तौ॥६५॥ पार्ष्णिप्रहरणाध्यासयाहितोदयरंहसा॥ पं
चयोजनमानान्मस्तेनाऽध्वे नव्यलंघ्यत॥६६॥ तौ च पर्वतमारूढावयं तस्तस्य किंनरौ॥ तत
स्तद्रूहरणेऽप्याशां हृदयादुत्ससर्ज सः॥६७॥ अश्रांतो दन्तु समं तु चकश्चित्परिजनोनतं॥ तार्क्ष्येणा
प्यनुगम्येत धावन्निंद्रायुधः कृतः॥६८॥ अथ कल्यं समारूढ्यामश्रमस्वेदार्द्रीविग्रहं॥ दृष्ट्वैकाकिन

मात्मानेष्ववसंतं च तुरंगमम्॥६९॥ निर्वर्णयंस्तमुद्देशं मानुषाणामगोचरं॥ विहस्यैवात्मनात्मा
नं सानुतापमचिंतयत्॥७०॥ अहो किमपि मे मोर्ख्यमस्थानाभिनिवेशिनः॥ यदात्मा बालकेनेव व्यर्थ
मायासितो मया॥७१॥ अगृहीतेन को वार्थः कोर्थः प्राप्तेन वाऽमुना॥ किंत्वरद्धितयेनेति मया मूढेन
नेक्षितं॥७२॥ पंथानमपि रूपितो नायमाविष्टेनेव धावता॥ नचात्र लभ्यते मत्यौमि मम मार्गस्य देशिकः
॥७३॥ श्रूयते किल वर्षस्य भारतस्याऽवसाने ॥ केलासस्यान्तिके देशमिह मर्त्यस्य का कथा॥७४॥
वने पर्णतृणाकीर्णे पादस्तुङ्गाश्च वाजिनः॥ नस्पुर्यदि तु सारेणयास्यामि शिबिरं शनैः॥७५॥ के
वलं दक्षिणामाशां पुरस्कृत्य यथा तथा॥ गंतव्यं किं तु मध्याह्नसमयोऽयमुपस्थितः॥७६॥ अनु

राम
२२

22

भ्रतो तिमात्रेण खेदस्तद्दिह सांप्रतं॥लब्धाकुतोप्यपस्तान्निर्यास्याम्यपि विगतश्रमः॥७७॥इत्थं
विचिंत्यपानीयमन्वेष्टुमितस्ततः॥परिभ्रमन्घनस्निग्धं शाखिनां खंडमैक्षत॥७८॥ततस्तदनु
कूलेनपथाऽगच्छत्समीरणैः॥आघ्रायंते नवोत्फुल्लकमलामोदवाहिभिः॥७९॥मत्तद्विपमहासि
क्तमृणालदलदंतुरे॥सपेयानमथाऽपश्यदंभस्तामनुमापकम्॥८०॥तेनगत्वाऽग्रखंडस्याम
ध्येजलधिसन्निधाने॥अदृष्टपारपर्यंतमालुलोकमहत्सरः॥८१॥तदालोकनमात्रेण दूरादपग
तश्रमः॥प्राप्यतत्पुलिनोपांतं वाजिनोऽवततारसः॥८२॥कृत्वाऽपनीतपर्याणंतंस्थलीलुठितोत्थि
तं॥गृहीतशाड्वलग्रासमासनाधूतकेसरं॥८३॥उत्तार्य्यसरसस्तीरतरौ संयम्यवाजिनं॥स्थित्वा

ऽस्निग्धे तुल्लूनानि तृणान्यत्र स्यचाग्रतः ॥ ८४ ॥ स्वयं सस्नौ पपौ वारि बुभुजे बिसकंदलीः ॥ उत्तरीयशिरो
धानो निषसाद महीशिलातले ॥ ८५ ॥ ततोऽस्तङ्गते विश्रान्ते उत्तरस्मिन्सरस्तटे ॥ समुच्चरं तं सुश्राव गी
तध्वनिममानुषं ॥ ८६ ॥ तस्यां दिशि हृदासक्तचक्षुरुत्क्षिप्तकंधरः ॥ तमाकर्णयितुं विडम्बोत्रम्भुक्तिरिंद्रायु
धोऽशृणोत ॥ ८७ ॥ कुतोऽत्र विजने गीतमित्याविष्कृतकौतुकः ॥ उत्थाय चंद्रापीडोऽथ तामेव दिशमभ्य
भ्यगात् ॥ ८८ ॥ गीतश्रवणलुब्धेन सलीलमभिधावता ॥ अश्वेनापि मार्गोऽस्य मार्गणेव न्यवेद्यत ॥ कथ्यते स्म ३
॥ ८९ ॥ गत्वा प्रासादमैक्षिष्ट स्फाटिकं नातिदूरतः ॥ हसंतमिव कैलासलक्ष्मीं विनवमं भुजिनः ॥ ९० ॥
देवं चतुर्मुखं तत्र रत्नपीठप्रतिष्ठितं ॥ भगवंतमुमाकान्तं ददर्श प्रणनाम च ॥ ९१ ॥ तस्याः प्रदक्षिणां राम
प्रासादे २२

मूर्त्तिमाश्रित्य विहितासना ॥ उत्संगनिहितां वीणां वादयंती कलस्वनां ॥८२॥ देवै प्रस्तावितानेन ॐ
द्गौरेणासर्प्पता ॥ सा साक्षाल्लक्ष्मीरिव क्षीरजलधेर्म्मध्यवर्त्तिना ॥८३॥ कोपाग्निशमितानंगप्रसुप्तीव
नवोत्थया ॥ रतिः प्रसादयंतीव तपसा पार्वतीप्रिये ॥८४॥ नवेऽपि वयसि प्राप्तवैराग्या न्यासवासना ॥ व्य
चंद्रापीडेन लोकि कन्यका तेन धृतपाशुपतव्रता ॥८५॥ चंद्रापीडस्ततां दृष्ट्वा विस्मयाविष्टमानसः ॥ केयं
स्यात्कन्यका नाऽस्यादिव्यतां प्रतिसंशयः ॥८६॥ नोत्तस्थौ निभृतं गत्वेन्नवागगनमुत्पतेत ॥ नमोनमवलं
वेतमर्त्त्यसंदर्शनेन वा ॥८७॥ इत्यादि चिंतयन्नास्तस्ते नावासितविग्रहः ॥ गीतावसानसमयप्रती
क्षणपरायणः ॥८८॥ सा च गीतं समाप्याथ विनिधाय च वल्लकीं ॥ प्रणम्य देवमुड्डाय चंद्रापीडमसा

षत॥९९॥ अतिथेस्त्वागतं तुभ्यं सौम्य विश्रम्यतामिह॥ आसोऽसि स्वामि मांऽश्रमिमित आगम्यता
मिति॥१००॥ चंद्रापीडस्तदाकर्ण्य वद्धांजलिरानम्रमभ्यगात॥ वडेती मनुवव्राज देवतावस्त्रएम्यतो॥१॥ वि
वेशनातिदूरेऽथ निजासनगुहामसौ॥ स्थिताजिनकुशाऽलांबुपात्रदंडकमंडलुं॥२॥ तत्र दर्भास
नासीनमुपविष्टा मृगाजिने॥ पप्रच्छ चंद्रापीडं सा स्वरूपागमनादिके॥३॥ स तु सर्वं यथावृत्त
मात्मवृत्तं सविस्तरं॥ सा च विज्ञाय वृत्तांतं निर्जगाम बहिर्गुहः॥४॥ गृहीतभिक्षापात्रा च क्षणमा
त्रं तरोरधः॥ आस्तर्यत स्वयं शीर्णैः फलैस्तैरमृतोपमैः॥५॥ ततस्तदुपयोगाय चंद्रापीडं न्ययुंक्त सा
॥ अघतेस्माद्व यातास्यास्सच विस्मयमानधीः॥६॥ तस्मिन्नथ कृताहारे गिरिप्रस्रवणांतिके॥

राम
२४

भिक्षापात्रमू२ चंद्रापीडेन१ फरणा१

गत्वासापि फलाहारप्रक्रियामात्रमाचरत् ॥७॥ आगत्य च पुनस्तस्मिन्नुपविश्य मृगाजिने ॥ ता
रापीडोऽङ्गयित्न्यादिकथया क्षणमास्त सा ॥८॥ अपि नाम स्ववृत्तं न मम हृदे वापि वर्णीयेत ॥९॥ एवं तेवं
क्षणे दध्यौ चंद्रापीडस्स कौतुकः ॥१०॥ दृष्ट्वा चाऽस्याः प्रकृतिमधुरामाकृतिं भावशुद्धिं दाक्षिण्यं
स्ववार्त्ता ४ च प्रकृतिसरलं लब्धवाक्याऽवकाशः ॥ आत्मोदंतं नियतमखिलं वक्ष्यति प्रार्थितयै चंद्रापीडः क्षण
विन्यास ५ कृतरतिः प्रश्नसंप्रैत्यपोऽभवत् ॥११॥ ॥ इति कादंबरीकथासारे त्रतीयः सर्गः ॥ ॥३॥ ॥
सतद्गुणाप्रभावर्द्धिवर्द्धमानकुतूहलः ॥ तामवोचत माधुर्यविनयोदारया गिरा ॥१॥ त्वत्प्रसादक्षते
नैव प्रागल्भ्येन ममाऽमुना ॥ मनो भगवति प्रश्नचापले विनियुज्यते ॥२॥ न मा दृशादृशोऽन्नमिरि

यमाश्चर्यसंततिश्चानदारव्यानप्रसादेनजैनौ यमनुगृह्यतो॥३॥ कतमो मुनिगंधर्वसिद्धविद्याधरादि
षु॥ पुण्ये नजन्मनावासो भगवत्या विभूषितः॥४॥ पंच भूतात्मकं चेदं धत्ते धवलतां वपुः॥ कथं का
मपि दिगंतिदंतकांत्यतिशायिनी॥५॥ नवे वयसि किं चातितीव्रवैराग्यकारणं॥ येनारण्यनिवा
सादि दुःखमीदृग्विषह्यते॥६॥ इतितस्मिन्वदत्येवं स्थूलाश्रुकणवर्षिणी॥ रुरोद वल्कलच्छन्नव
दनादिव्यकन्यका॥७॥ अकंपत मनश्चैनां चंद्रापीडस्य पश्यतः॥ इयमप्याकृतिर्नाम द्वंद्वं दूयद
जिह्मयते॥८॥ असौ चिरं रुदित्वाथ वल्कलोन्मृष्टलोचना॥ दीर्घमुष्णं च निश्वस्य व्याहर्तुमुपच
क्रमे॥९॥ राजपुत्र किमेतेन प्रोक्तेन वसतेर्मम॥ पापायामे दत्तागपाया वृत्तांतेन श्रुतेन ते॥१०॥

सुखदुःखे ५
वक्तुं २
राम
२५

तथापि यदि ते चित्तं कृतहृल्लवशीकृतं ॥ तदिदं वर्ण्यते सर्वमाकर्णय यथाक्रमं ॥११॥ सुप्रसिद्ध
मिदं तावत् गतं श्रुतिपथं तव ॥ यत्संत्यप्सरसो नाम सुरसद्मनि कन्यकाः ॥१२॥ चतुर्दश च तद्वंशाः
पृथक् पृथगवास्थिताः ॥ सोमामृतसमीरा-ऽर्क-दक्ष-मन्वादिसंभवाः ॥१३॥ दक्षकन्योद्भवं तेषु गंध
र्वाणां कुलद्वयं ॥ कन्ये मुनिश्चारिष्टेति ह्येदक्षस्य बभूवतुः ॥१४॥ तत्रैव चित्ररथो नाम गंधर्वाणामधीश्व
रः ॥ मुनेः कृतयशाः पुत्रश्चित्रसेनादिसर्वजः ॥१५॥ तुंबुरुप्रभृतीनां तु ज्येष्ठो रिष्टासुतः कृती ॥ हंसाभि
धानो गंधर्वराजः प्रथितपौरुषः ॥१६॥ अस्त्रि । त्रिभुवनमुत्पन्नमन्युकालुष्यदूषणं ॥ गाढं परस्परं प्रे
मैतयोर्गंधर्वराजयोः ॥१७॥ इतश्च नातिदूरेऽस्ति नानारत्नोज्ज्वलो गिरिः ॥ हेमकूट इति ख्यातस्तस्मिन्
चित्ररथहंसयोः १

कुलद्वये ४

26

हंसगौर्याः ४

वामस्तयोर्द्वयोः॥१८॥ तस्मिंश्च संत्यसंख्याता स्तत्र तु जनास्ते समसेविताः। गंधर्वास्तौ च विश्वंजनर्षभिर्जन
द्विषः पुरा॥१९॥ अथ यत्सोमसंभूतमेकमप्सरसां कुलं॥ गौरी नामोदभूत्कन्या तस्मिन्प्रति कृतिः
श्रियः॥२०॥ हंसो गंधर्वराजः तामुद्वहेन्तु हिनप्रजो॥ ततो यथार्थनामा पसर्वेप्या हंसगामिनी॥२१॥
चिरसंभृतविस्रंभनिर्भरं गृहवासिनोः॥ तयोः रुदन्नवत्सू तु रेकोपि नमहात्मनोः॥२२॥ अहं तु मंद
भाग्यैकाकन्याउद्भूतकारिणी॥ उदभूवं तयोरस्य दुःखभारस्य भाजनं॥२३॥ अनपत्यतया तातो
मज्जन्म सुतजन्मवत्॥ अमन्यत कृतानंदः कृतोदारमहोत्सवः॥२४॥ देहच्छायामिमां वीक्ष्य ता
तः सोमकमपातो॥ चक्रे वर्णानुरूपं च मम हंसेति नाममे॥२५॥ साहं पितृगृहे बाला वल्लका

राम
२६

वकलस्वना॥संचरंतीस्वबंधूनामेकादेकमहर्निशं॥२६॥अनवाप्तरसास्वादस्नेहाद्दिहृदसंतति
अत्यावाहयमञ्जेशापेशलस्थितिशैशवं॥२७॥अथवाल्यात्परंप्राप्तेमयानानारसोचिते॥मनोभव
विकारालंमेकमायमतेनवयः॥२८॥कदाचिदथरम्येशुममधुमासदिनेष्वहं॥अच्छोदसरसिस्नातुमा
गताऽहंसहांऽवया॥२९॥अदृष्टपूर्वदिन्यत्रमंजरीमहमाम्रतीं॥सखीजिस्समहपश्यंतीकाननेव्यच
रं[illegible]चिरं॥३०॥कस्मिंश्चिदपिदेशेऽन्यपुष्पगंधाभिभावनं॥अन्याङ्घ्रिमनाघ्रातपूर्वमामोदमद्भु
तं॥३१॥तंसंपृश्यन्नवग्जिघ्रासारसेनविहितत्वरा॥नातिदूरंततोगत्वाऽपश्यंमुनिकुमारकं॥३२॥अस्य
हस्मिवकंदर्पमीशाननयनाचिषा॥कलोकविभूषाबिंबमद्भूषितमिवैंदवं॥३३॥विहृदैरपिस्वरूपस्य

आमोदस्य२

आमोदं २ मुनिकुमारेण १

मेखलाजिनवल्कलैः॥ कृताधिकमनोहारिरूपातिशयविभ्रमं॥३४॥ तैर्न कर्णे कृता काचिद् प्रवातरुहे
मंजरी॥ ततः प्रवत्रमामोदं समाघ्रातवती मुहुः॥३५॥ तैः कृतोप्यागते कांतेलावण्यामृतनिर्झरं॥ च
क्षुषैव पिबंतीव कौतुकोत्क्षिप्तपक्ष्मणा॥३६॥ रूपैकपक्षपातेन गुणदोषाऽनपेक्षिणा॥ ततः कुसु
मबाणेन नीतास्मि वशमात्मनः॥३७॥ ततोऽपसर्तुकामाऽहमप्रगल्भतया मुहुः॥ केनापि प्रियमा
णो वतदंतिकस्थ पागमम्॥३८॥ वेघोस्तु निजनस्पेति प्रचलन्मणिकुंडली॥ अकार्षं वंदनं तस्मै तन्मु
खन्यस्तलोचना॥३९॥ ततः कृतप्रणामायां मयि सोपि मनोभुवः॥ पतितो गोचरे चित्रमवे
ध्यामनवितथ्यता॥४०॥ स्मरतोपदिष्टयेवाऽथ बुद्ध्वा तद्धृदि कतिं धिया॥ लज्जावकाशारूपादिप्रश्नेषा

गत्वन्माऽगमं ॥४१॥ अथ पार्श्वस्थमद्राक्षमनघं मुनिकुमारकं ॥ तुल्यते जस्तपोवेषेन स्यसब्रह्मचारि
णं ॥४२॥ भगवन्नृकथ्यतां कोऽयं किमाख्यः किमिहागतः ॥ कर्णे च निहिताऽनेन कस्यायं मंजरी
तरोः ॥४३॥ सोऽब्रवीत्सुरलोकेऽस्ति सुरासुरशिरोर्चितः ॥ श्वेतकेतुरिति ख्यातो रूपेणाऽप्रति
मो मुनिः ॥४४॥ पुंडरीकं सरः स्नातुं मया सार्धं कदाचन ॥ नित्यं संनिहिता तत्र लक्ष्मीरेनं व्यलोक
त ॥४५॥ सा तदालिंगनेनैव दर्शनेनैव केवलं ॥ पुंडरीके कृतार्थत्वमवापत्स्या सनीकृते ॥४६॥ उप
पादि तदैवाऽस्य कुमारः सतयाश्रिया ॥ तव पुत्रोयमित्युक्त्वा सा ददौ श्वेतकेतवे ॥४७॥ सोऽपि योग
दृशा दृष्ट्वा यथावस्तु तमग्रहीत् ॥ नाम जन्मानुगं चास्य पुंडरीक इति व्यधात् ॥४८॥ योजयामास

५ लक्ष्मीः

अतुल्यः ३

श्वेतकेतुं ४

संस्कारैरेनं मुनिजनोचितैः॥४८॥ तावद्बालभावेनाप्ययं कृततपसे पिता॥४९॥ अयं स पुंडरीकस्ते वर्णि
तः शृणु मंजरीम्॥ चतुर्दशीति कृत्वोऽद्य प्रस्थितो ऽयं शिवालये॥५०॥ व्रजतो नंदने चाऽस्य वनदे
वतया स्वयं। चदाहृते रलंकारस्तु कल्पो यमिति सादरं॥५१॥ पारिजातद्रुमादेषा दुग्धोदधिसमुद्भ
वात्॥ आदाय मंजरी कर्णेऽनिकृतोपि निवेशिता॥५२॥ इति तस्मिन्वदत्येवं चापलेनैत्य तामियम्।
किमनेन तनुया हखेदेनेत्यभिधाय मे॥५३॥ अंना यि मुनिना तेन सासुरद्रुममंजरी॥ अपनीय नि
जात्कर्णान्मम कर्णावतंसता॥५४॥ मत्कपोलतलस्पर्शप्रकंपतरलांगुले॥ भ्रश्यंतीतेन्माऽज्ञायि
स्वाक्षमाला निजात्करात्॥५५॥ अप्राप्तैव च सा भूमिं मया हि सहसा मया॥ तस्मिन्नवसरे ह्यत्रया

नीता ३ पंचरात्रेण ३

हि लीमामवोचत ॥५६॥ स्नातादेवाचिरं मत्तुं हारि केगम्यतामिति ॥ तस्मात्प्रतिनिवृत्तायां मयि तस्य
सखावदत् ॥५७॥ वयस्य किमिदं चेतस्त्व विद्रुतमीदृशं ॥ हतामप्यनयाऽज्ञासीरक्षमालां न कन्य
या ॥५८॥ हृता नामेयमनया हृदयं न तु रक्ष्यतां ॥ ततोऽसौ तु नरागत्य कृतकोपमिवाऽब्रवीत् ॥५९॥
अपहृत्याऽक्षमालां मे कचौरिणि तु गम्यते ॥ अथ मंदं विहस्यैवमयाऽस्यै नि हिताकरे ॥६०॥ अवमु
च्याऽक्षमालेति कंगन्तु मुक्तावली निजा ॥ साप्यालक्ष्य तनाऽनेन मन्मुखासक्तदृष्टिना ॥६१॥ सखीनि
रपि मे दृष्टमिदं चापलमुत्सुकैः ॥ किं चित्तं जातलज्जेव सरस्तटमुपागमम् ॥६२॥ तत्राऽहमस्त ते त्रैव स्तु
ऽस्नात्वा यथा तथा ॥ क गताऽस्मि किमायाता दृष्टः कोसावहं वका ॥ किमिदं कः प्रकारोऽयमितिना

५ पुंडरीकेन

ग्रहा दितिहि ३
पुंडरीकस्य ४

ह्रासिषं तदा ॥ ६४ ॥ मुहूर्त्तौ दिवतां बूलकरंकग्राहिणी मम ॥ प्रिया तरलिका नाम सा प्रविश्येदमब्र
वीत् ॥ ६५ ॥ कर्णेस्मु निकुमारेण कृता तेयेन मंजरी ॥ त्वय्यागतायां दृष्टोऽस्मि स्वरूपं तेन तावकं ॥ ६६
तं दृष्ट्वा मदियं तेन लिखित्वा वस्त्रपट्टिका ॥ एकाकिन्ये त्वया तस्यै देये त्युक्त्वा समर्पिता ॥ ६७ ॥ त
तस्तरलिकायास्तां हस्तादादाय पट्टिकां ॥ तस्यां तल्लिखितामार्यामिमामहमवाचयं ॥ ६८ ॥ दूरं मुक्ता
लतया विससितया विप्रलभ्यमानो मे ॥ हंस इव दर्शिताशो मानसजन्मा त्वया नीतः ॥ ६९ ॥ सा त्वं तैमि
रिकस्येव वन्ध्यवड्डलक्षणा ॥ मोहाय यायाष्यनाथ्यैव सुतरां मनसो मम ॥ ७० ॥ वद तेन किमुक्ताऽसि स
किमुक्तस्त्वयापि वा ॥ तदंतिके च विस्रब्धमुषितासि कियच्चिरं ॥ ७१ ॥ एवं तरलिको तत्र चालयंती पुनः पुनः

३ स्वरूपं

29

स्व २९

राम

पुंडरीकशंकया ३

काचिदङ्कस्ततो मात्रा त्वन्मत्तेवाऽत्यवाहयं ॥७२॥ अथ प्रलंबमानेऽर्के प्रतीहारी प्रविश्य मे ॥ सर्वदारिक
या दृष्टौ यौ तौ मुनिकुमारकौ ॥७३॥ तयोरन्यतरो द्वारि तिष्ठतीति न्यवेदयत् ॥ शीघ्रं प्रवेशयेत्युक्ता मयात
द्विनिशंकया ॥७४॥ सा च प्रवेशयामास तस्य तं सहचारिणी ॥ सत्कारेणोचितेनाऽहं मन्ये चैनमपृच्छयं ॥७५
मुहूर्त्तमिव विश्रम्य पर्यंके मदुपाहृते ॥ मदुत्तरीयसंमृष्टमाधौतचरणद्वयं ॥७६॥ दृष्टिं तरलिकायां च
कृत्वा कामः क्षणं व्यधात् ॥ मया सोऽज्ञायि पृष्टः स कलज्जमानइवाऽभ्यधात् ॥७७॥ अहं कपिंजलो नाम तस्य
बालसुहृन्मुनेः ॥ न वाक्प्रवर्त्तते चास्मिन् जनस्य स्तुदिवाऽध्वनि ॥७८॥ क्वायं मुनिजनः शांतः क्व चाऽमारा
गविभ्रमाः ॥ तथापि व्यवसायो मे सुहृत्स्नेहरुगाश्रितः ॥७९॥ न दूयसे प्रयाता या राजपुत्रि तदा मयि ॥

हस्ते मुक्तावली विन्यस्ता मम मांतिकमागतः॥८०॥ अहो रम्याऽस्य मालेयं त्वया नीतेति तद्वचः॥ विह
स्य स मया किंचिन्नोक्तश्चिंतोपपत्तये॥८१॥ नोपदेशप्रकारोऽसौ न सहर्षोत्तविस्तरः॥ न सोऽस्तु
पायो मंत्रो वा यो मया नाध्यधीयत॥८२॥ वचोभिः खिद्यमानो मे त्रपानतशिरोधरः॥ क्षणमेतर्हितो मक्तः
सुतरामामपीडयत॥८३॥ कष्टादिव मया लब्धो विविक्तः सकलं वनं॥ अन्य एव स संवृत्तो वत्स सांयो
नगोचरः॥८४॥ तदवस्थं तमालोक्य विरताशः प्रबोधने॥ अहं तन्मार्गणारक्षार्थमेवं यत्नपरोऽभवं॥
॥८५॥ आसीर्येन ह्लिनीपत्रशयनं चेदनोज्झितं॥ तत्रस्थस्यास्य कर्परपांसूनंगे घनाकिरे॥८६॥
त्रपया तदवस्थोऽपि स किंचिदद्रुमद्रुमः॥ स वाष्पमलिनां दीनां मयि दृष्टिमपातयत्॥८७॥ ततो

राम 30

ऽहमिदमेवात्र प्राप्तकालमचिंतये॥ राजपुत्रि सुहृत्प्राणदक्षिणार्थमुपागतः॥८८॥ अतःपरं तु सा
मर्थ्यागतार्थाममयागिरः॥ कंगे वि परिवर्त्तेतेकश्चित्त्व मपि वेत्स्यतां॥८९॥ इति तस्मिन्वदत्येव प्रविश्य
ऽहाह कंचुकी॥ चमत्स्वस्थशरीरे ति ज्ञात्वा देवी समागता॥९०॥ तच्छ्रुत्वाऽऽऊन सम्भ्रमईजारुय्यानिःकपिंज
लः॥ न स प्रतिवचः किंचित्मामकीनमपेक्षत॥९१॥ तदुक्तौ तु दर्शनं तस्य जनस्याविघ्नतादृशी॥ आगतो
वागतां वापि नाऽहमेवामलत्तये॥९२॥ ततः कमलिनी त्यक्त्वा रात्रौ क्वापि गते रवौ॥ उदिते सर्वथा वा
मे विधौ वैधैर्य्यनाशिनि॥९३॥ उन्मूलितेव कामेन दग्धेव विरहाग्निना॥ पुनस्तरलिकामेव साऽस्रक्कं
ठमवादिषं॥९४॥ अहं यथा न यावा पि न वेयं समनुमन्यते॥ कथं नु विष्यती त्येषा चिन्ता दोलायतीव मां॥९५॥

3|

इतः शास्त्रं कुलाचारो लज्जा गुरुजनाद् भयं ॥ इतः कामोऽति दुर्द्धर्षो विरहे मरणाद् भयम् ॥ ९६ ॥ वद किं
करवाण्यत्र घूर्णतीव मनो मम ॥ मा भून्मे दुस्तरे विप्रवधे नरकनिमज्जने ॥ ९७ ॥ इत्यादि विलपन्त्या
मे तत्कालमुपलज्जोदया ॥ जहार चेतनां मूर्छा निद्रेव नयनद्युतिं ॥ ९८ ॥ अथ मोग्राहयित्वाऽसौ सं
ज्ञां शीतजलानिलैः ॥ निपत्य पादयोस्तस्याः साश्रुनेत्रा तरलिकाऽवदत् ॥ ९९ ॥ गान्धर्वरीत्या विवाहोऽयमिष्ट
याऽन्योन्यसंगमः ॥ शास्त्रेष्वपि गीतस्तस्मात्त्वं लोप्तुं न हि गम्यतां ॥ १०० ॥ तथेव सुहृदा तत्कालयोग्यवेषस्र
हा रहिता ॥ तामेकामग्रतः कृत्वा निर्गताऽहमलक्षिता ॥ १ ॥ अभ्यागममभिप्रोन्मभिमोत्सुकचटुलैः प
दैः ॥ तदा मे दक्षिणं चक्षुरस्पन्दत मुहुर्मुहुः ॥ २ ॥ अव्यक्तमिव चाऽश्रौषं कानने रुदितध्वनिं ॥ तेनैवोम

अभिसारिकारू
पधरेत्सर्गः ५

राम
३१

इत्यादि विलपंतं कपिंजलमशृणुवमिति श्लोकचतुर्थेनान्वयः १

न्नपेशोकाऽहमगच्छमधिकत्वरा॥३॥पदानिकतिचिद्गत्वा·हा·वयस्यतपोनिधे॥पुंडरीककयातोऽ
सिमूर्छांकृत्वाजगत्त्रये॥४॥हाहतोऽस्मिविलीनोऽस्मिदग्धोऽस्मिकरवाणिकिं॥गत्वातातस्यवदनामिन्वे
तकेतोःकिमयतः॥५॥अयिपापेमहाश्वेतेनतुष्टाऽस्यऽनमालया॥हतामेसुहृदोऽसुघ्नप्राणवृत्तिरपि
त्वया॥६॥वयस्यदेहिमेवाचंनजीवामित्वयाविना॥ततोऽशृणुवमित्यादिविलपंतंकपिंजलं॥७॥अथ
प्रकंपमानांगीविसंष्ठुलपदक्रमा॥केनाप्युत्क्षिप्यनीतेवतंप्रदेशमऽयाशिषं॥८॥गत्वातमहमद्राक्षंत
वरुणोत्क्रांतजीवितं॥किंचिरेणागताऽसीतिरुषित्वेवतथास्थितं॥९॥एतावदुक्त्वामूर्छांधास्वहंतो
तमनंतरं॥विवस्यंतीवसाकन्यानिपपातशिलातले॥१०॥प्रनष्टचेतनांचैनांचंद्रापीडोव्यलोकयत॥

३२

प्रभ्रकारिणमात्मानं हन्तागसमपन्यत ॥११॥ ससंभ्रमं समुत्थाय कदलीदलमारुतैः । तोयैश्च शि
शिरैःस्वकैः संज्ञामेनामजिग्रहत ॥१२॥ अवाप्तचेतसो नाचाऽसौ स्मृत्वा तद्व्यसनं निजं ॥ तदेवानुव्र
वंती वरूरोद विललाप च ॥१३॥ तस्याणामथ नजृंतहृदयानि तदाभुव ॥ प्रतिशद्देन वैवोद्वेर्हृशा
पि रुरुदुश्चिरे ॥१४॥ चंद्रापीडोपि तामाह वाष्परुद्धविलोचनः ॥ आस्तां न शक्यते वक्तुं मोहे वा
न्यदःऽतः परे ॥१५॥ कथमप्युपसंहृत्य शोकावेगं तु साऽवदत् ॥ किमतः परमस्तूपःऽयन्हा चांद्योतय
मेवच ॥१६॥ किं तु क्लेशाय येनाशाबंधेन हतजीवितं ॥ राजपुत्र त्वतिनःमीदं तदाश्चर्यं वयामिते ॥
॥१७॥ तदा तस्यातितीव्रस्य दुःखदावस्य तादृशः ॥ न काचिन्मरणादन्या मया ग्राहि प्रतिक्रिया ॥१८॥

राम
३२

मरणव्यवसायनिश्चयेकृतवत्यस्मिंश्चसंविधानके॥ निरियायचचंद्रमंडलात्पुरुषःकोपिहिमोप
मद्युतिर्नभस्य॥ सोऽवतीर्य्यगगनान्महीतलेतंनिधायभुजपंजरांतरे॥ उत्पतन्दिवमुदात्तयागि
रामामवोचतपितेवसांत्वयन्॥२०॥ विरममरणोपायादस्मात्प्रियेएतावाऽमुनापुनरपिमहाश्वे
तेवत्सेनविष्यतिसंगमः॥ [illegible]॥ इतिगिरमिमांश्रुत्वातस्मात्ससंभ्रमविस्मयाकिमिदमितितंतत्रा
पृच्छंस्तस्यकपिंजलो॥२१॥ प्रियसखमपस्यत्वकाधुनागच्छसीतिस्फुरितविकटकोपाटोपमु
क्ता ईदृक्ः॥ ममवचनमदत्वाकिंचिदेवातिवेगात्कृतपरिकरवंधश्चोऽप्यऽगाद्दंतरिक्षं॥२२॥ प्रत्य
संममतेत्रयोपिविविविश्नुःशीतत्विषोमंडलेतत्संप्रत्ययसंहतोचिंतविधिःसास्मिंश्रितेदंब्रतं॥

ताते नापि ततः प्रभृत्यहमिहासीनेव तेनु गृहं यत्नेनापि न पारितेति स चिरं स्थित्वागतः स्वान् गृहान् ॥१७॥
॥ ॥इति कादंबरीकथासारे चतुर्थः सर्गः ॥४॥ ॥श्री॥ ॥इत्यावेदितनिर्व्याजवृत्तांतवक्त्रविस्तरा ॥ विर
राज महाश्वेता निश्वासस्नपितद्रुमा ॥१॥ चंद्रापीडस्ततस्तस्या यन्मनोजवविजृंभितं सकंपविस्मयोप्यंत
स्तामथोवाच सांत्वयन् ॥२॥ मया तेचिरवृत्तोपि परिणाममपश्यता ॥ शोकः प्रत्यग्रतां नीतः कौतुका
विष्टचेतसा ॥३॥ सा त्वमर्हसि कल्याणि न शोकं कर्तुमीदृशं ॥ आश्वासितासि देवेन नूनं चंद्रमसा स्वयं
॥४॥ कोन्यस्तथाविधाकारस्तद्भक्तिर्मंडलान्नतः ॥ निर्गत्य तत्रैव विशन्निशि संभाव्यते नरः ॥५॥ श्रू
यंते गतयश्चित्रा देवतानामनेकशः ॥ वरशापतपःशक्तियोगवैचित्र्यनिर्मिताः ॥६॥ श्वेतकेतुश्च तस्या

राम
२२

स्ते प्रजापतिसमः पिता ॥ नास्त्येव तस्यापैते सामवश्यं नाम किंचन ॥७॥ इत्यादियुक्त्युपन्यासैरिति
हासैश्छिद्रशनैः ॥ महाश्वेतां समाश्वास्य पुत्रः पत्रलतामसौ ॥८॥ सा तेन तरलिका नाम विस्रंभे नतिर्भ
तासखी ॥ गता भगवतिक्लाघ नहि सा दोविसुंचति ॥९॥ दृष्टो वा च महाश्वेताक्का सौ याति तपस्विनी
मृगेव त्रापि निमित्तं मे यथासो प्रहिता मया ॥१०॥ यश्च चित्ररथो नाम गंधर्वाधिपतिर्मया ॥ वर्णितो
येन देवो येनत्पश्चापि महेश्वरः ॥११॥ येन खानितमत्युत्तमच्छोदाख्यमिदं सरः ॥ येन चैत्ररथं नाम हृ
तमेतच्चकाननं ॥१२॥ यस्यामृतात्समुत्पन्ने प्रसृतान्सरसां कुले ॥ महिषी मदिरा नाम जीविताद पिव
ल्लभा ॥१३॥ तयोः कादंबरी नाम कन्यास्ति नवयौवना ॥ लक्ष्मीमुपहसंतीव रूपलावण्यविभ्रमैः ॥१४॥

विश्वासनिर्भ
रैत्यर्थः २

३५

नयासह महाश्रमवाल्यात्प्रभृति मे तथा॥ यथैकमेव ज्ञातानिश्चितोऽश्विनमावयोः॥१५॥ विदित्वा दग्ध

वृत्तांतमिमं सपदि मामकं॥ साऽग्रहीत्रियमं बाला वार्यमाणापि बंधुभिः॥१६॥ महाश्वेताऽस्य दुःख

स्य या क्लेलमतेऽवधिं॥ तावन्मया न सो दृष्टव्यो पाणिग्रहणे हे मात्मनः॥१७॥ यतो यथा यथा तस्या यौ

वनश्री र्विजृंभते॥ ततस्तथा तथा खेदं धत्ते चित्ररथः परं॥१८॥ संदिष्टं तेन मे पुत्रि यत स्वा वदिता

तथा॥ यथैषा मे दुर्ग्रह ग्रंथिं विमुंचति तव स्वसा॥१९॥ ततस्तरलिका तत्र मयाऽत्र करणेऽचिते॥ प्र

हिता वक्तु संदिश्य प्रश्व श्वागंत्ये वसा ततः॥२०॥ इतीत्थं कथया नीत्वा महाश्वेताश्रमे दिने। चंद्रा

पीडः प्रयाते स्तमर्के संध्याविधिं व्यधात्॥२१॥ तत्रैव द्रायुधमानीय संयम्यानिचुले कचित्॥ महा

श्वेतोदिने देशे पर्णशय्यामकल्पयत्॥२२॥ तस्य शय्यां निषण्णस्य श्रांतस्यापि यथा तथा॥ कथामाश्च
र्यवद्भूतां तामेव ध्यायतस्त्विभीरे॥२३॥ पुनः पुनर्महाश्वेतां वैशंपायनमैक्षत॥ पत्रलेखां च सा रात्रिर्ग
ताप्रायेण जाग्रतः॥२४॥ इंद्रायुधमश्ववाहात्योमहाश्वेतां सुखेदृशे॥ स प्रत्यभिज्ञमश्वोपि हृष्टिमानु
पवद्धृतौ॥२५॥ प्रयातायां तु सर्वर्यां कृतप्रात्तातिकक्रिये॥ समाधेरुत्थितां तु द्याम महाश्वेतां तदंतिक
म्॥२६॥ चंद्रापीडे प्रविष्टे च नातिदूरं गते रवौ॥ स गंधर्वकुमाराऽसौ ततस्तरलिकाययौ॥२७॥ साप्रवि
महाश्वेतां प्रणिपत्योपविश्य च॥ सिद्धार्थासीति तत्स्पृष्टा चलितयावमब्रवीत्॥२८॥ त्वत्संदेशं निशम्यो
क्केयत्रयानर्हेदारिके॥ तच्चतत्काशनाकारि केयूरकमुखात्तच्छृणु॥२९॥ अथ केयूरकः प्राहनाऽ

६७

मज्जिज्ञासिचेतसः॥ स्वस्य स्वमेव चेतस्तो मन्मनः किं परीक्षसे॥३१॥ भूमिर्वैताढ्यशस्याऽहमुमालेन
स्पन्दयसः॥ तथा वननिवासिन्यो त्वय्यऽहं गृहवासिनी॥३२॥ आकर्ण्येतवसंदेशवचस्तारलिका
मुखात्॥ एषते प्रतिसंदेशः प्रियसख्या निवेदितः॥३३॥ इति स्फुलामहाश्वेता चिरं निश्चललोचना
चिंतइत्वाक्षिमप्यंतश्चंद्रापीडमवोचत॥३४॥ राजपुत्र तवोदारः समाचारश्च पेशलाः॥ तनोतिस नो
र्वजावेभ्य निस्पृहाणामपि स्पृहां॥३५॥ कादंबरी न चन्द्रेऽसंश्रुतं केयूरकात्त्वया॥ तत्रकोवाप्रतीकारः
स्वयं मन्मनाहते॥३६॥ इतो न दूरे गंधर्वराजधानी तदग्रतो॥ पश्याऽस्मदनुरोधेनप्योगेताऽसि
स्ववाहिनी॥३७॥ उदात्तमधुरामेनोदर्शयंत्याल्पदाकृतिं॥ वद्गंधर्वलोकस्य मया प्रत्युपकृतं नवेत्स्या॥३८॥

चंद्रापीडस्ततामाह वद्धक्ष्का जगवत्यलम्॥ अनतिक्रमणीयं ते मुनीनाम पिशासनं॥३९॥ आवर्त्रि
